ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## तृतीय काण्डे – चतुर्थ प्रश्नः

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 0.0 dated September 23, 2018.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 15, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

**Earlier Versions**

1st Version Number 0.0 dated September 23, 2018

# Table of Contents

3 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ............................ 4

3.4 तृतीय काण्डे चतुर्थ प्रश्नः – इष्टिहोमाभिधानं .................... 4

==============================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 3.4 तृतीय काण्डे चतुर्थ प्रश्नः – इष्टिहोमाभिधानं

**T.S.3.4.1.1 - Kramam**

वि वै । वा एतस्य । एतस्य यज्ञः । यज्ञ ऋद्ध्यते । ऋद्ध्यते यस्य ।
यस्य हविः । हविरतिरिच्यते । अतिरिच्यते सूर्यः । अतिरिच्यत
इत्यति–रिच्यते । सूर्यो देवः । देवो दिविषद्भ्यः । दिविषद्भ्य इति ।
दिविषद्भ्य इति दिविषत् – भ्यः । इत्याह । आह बृहस्पतिना ।
बृहस्पतिना च । चैव । एवास्य । अस्य प्रजापतिना ।
प्रजापतिना च । प्रजापतिनेति प्रजा – पतिना । च यज्ञस्य । यज्ञस्य
व्यृद्धम् । व्यृद्धमपि । व्यृद्धमिति वि – ऋद्धम् । अपि वपति । वपति
रक्षाꣳसि । रक्षाꣳसि वै । वा एतत् । एतत् पशुम् । पशुꣳ सचन्ते ।
सचन्ते यत् । यदेकदेवत्यः । एकदेवत्य आलब्धः । एकदेवत्य
इत्येक – देवत्यः । आलब्धो भूयान् । आलब्ध इत्या – लब्धः ।
भूयान् भवति । भवति यस्याः । यस्यास्ते । ते हरितः ।

हरितो गर्भः । गर्भ इति । इत्याह । आह देवत्रा । देवत्रैव ।
देवत्रेति देव - त्रा । एवैनाम् । एनाम् गमयति । गमयति रक्षसाम् ।
रक्षसामपहत्यै । अपहत्या आ । अपहत्या इत्यप-हत्यै । आ वर्तन ।
वर्तन वर्तय । वर्तयेति । इत्याह । आह ब्रह्मणा । **1 (50/58)**

**T.S.3.4.1.2 - Kramam**

ब्रह्मणैव । एवैनम् । एनमा । आ वर्तयति । वर्तयति वि । वि ते ।
ते भिनद्मि । भिनद्मि तकरीम् । तकरीमिति । इत्याह । आह यथायजुः ।
यथायजुरेव । यथायजुरिति यथा - यजुः । एवैतत् । एतदुरुद्रप्सः ।
उरुद्रप्सो विश्वरूपः । उरुद्रप्स इत्युरु - द्रप्सः । विश्वरूप इन्दुः ।
विश्वरूप इति विश्व - रूपः । इन्दुरिति । इत्याह । आह प्रजा ।
प्रजा वै । प्रजेति प्र-जा । वै पशवः । पशव इन्दुः । इन्दुः प्रजया ।
प्रजयैव । प्रजयेति प्र - जया । एवैनम् । एनम् पशुभिः । पशुभिः
सम् । पशुभिरति पशु - भिः । समर्द्धयति । अर्द्धयति दिवम् ।
दिवं ँवै । वै यज्ञस्य । यज्ञस्य व्यृद्धम् । व्यृद्धम् गच्छति । व्यृद्धमिति
वि-ऋद्धम् । गच्छति पृथिवीम् । पृथिवीमतिरिक्तम् । अतिरिक्तम् तत् ।
अतिरिक्तमित्यति - रिक्तम् । तद् यत् । यन् न । न शमयेत् ।

शमयेदार्तिम् । आर्तिमा । आर्च्छेत् । ऋच्छेद् यजमानः ।
यजमानो मही । मही द्यौः । द्यौः पृथिवी । पृथिवी च । च नः ।
न इति । इत्याह । **2 (50/58)**

**T.S.3.4.1.3 - Kramam**

आह द्यावापृथिवीभ्याम् । द्यावापृथिवीभ्यामेव । द्यावापृथिवीभ्यामिति
द्यावा – पृथिवीभ्याम् । एव यज्ञस्य । यज्ञस्य व्यृद्धम् । व्यृद्धम् च ।
व्यृद्धमिति वि – ऋद्धम् । चातिरिक्तम् । अतिरिक्तम् च ।
अतिरिक्तमित्यति – रिक्तम् । च शमयति । शमयति न । नार्तिम् ।
आर्तिमा । आर्च्छति । ऋच्छति यजमानः । यजमानो भस्मना ।
भस्मनाऽभि । अभि सम् । समूहति । ऊहति स्वगाकृत्यै ।
स्वगाकृत्या अथो । स्वगाकृत्या इति स्वगा–कृत्यै । अथो अनयोः ।
अथो इत्यथो । अनयोर् वै । वा एषः । एष गर्भः । गर्भोऽनयोः ।
अनयोरेव । एवैनम् । एनम् दधाति । दधाति यत् । यदवद्येत् ।
अवद्येदति । अवद्येदित्यव – द्येत् । अति तत् । तद् रेचयेत् । रेचयेद्
यत् । यन् न । नावद्येत् । अवद्येत् पशोः । अवद्येदित्यव – द्येत् ।
पशोरालब्धस्य । आलब्धस्य न । आलब्धस्येत्या – लब्धस्य ।

नाव । अव द्येत् । द्येत् पुरस्तात् । पुरस्तान् नाभ्याः । नाभ्या अन्यत् । अन्यदवद्येत् । अवद्येदुपरिष्टात् । अवद्येदित्यव – द्येत् । उपरिष्टादन्यत् । अन्यत् पुरस्तात् । पुरस्ताद् वै । वै नाभ्यै । नाभ्यै प्राणः । **3** (**50/59**)

**<u>T.S.3.4.1.4 - Kramam</u>**

प्राण उपरिष्टात् । प्राण इति प्र – अनः । उपरिष्टादपानः । अपानो यावान् । अपान इत्यप – अनः । यावानेव । एव पशुः । पशुस्तस्य । तस्याव । अव द्यति । द्यति विष्णवे । विष्णवे शिपिविष्टाय । शिपिविष्टाय जुहोति । शिपिविष्टायेति शिपि–विष्टाय । जुहोति यत् । यद् वै । वै यज्ञस्य । यज्ञस्यातिरिच्यते । अतिरिच्यते यः । अतिरिच्यत इत्यति – रिच्यते । यः पशोः । पशोर् भूमा । भूमा या । या पुष्टिः । पुष्टिस्तत् । तद् विष्णुः । विष्णुः शिपिविष्टः । शिपिविष्टो ऽतिरिक्ते । शिपिविष्ट इति शिपि – विष्टः । अतिरिक्त एव । अतिरिक्त इत्यति – रिक्ते । एवातिरिक्तम् । अतिरिक्तम् दधाति । अतिरिक्तमित्यति – रिक्तम् । दधात्यतिरिक्तस्य । अतिरिक्तस्य शान्त्यै ।

अतिरिक्तस्येत्यति - रिक्तस्य । शान्त्या अष्टाप्रूट् । अष्टाप्रूड्हिरण्यम् ।
अष्टाप्रूडित्यष्टा - प्रूट् । हिरण्यम् दक्षिणा । दक्षिणा ऽष्टापदी ।
अष्टापदी हि । अष्टापदीत्यष्टा - पदी । ह्येषा । एषा ऽऽत्मा ।
आत्मा नवमः । नवमः पशोः । पशोराप्त्यै । आप्त्या अन्तरकोशे ।
अन्तरकोश उष्णीषेण । अन्तरकोश इत्यन्तर - कोशे ।
उष्णीषेणाऽऽविष्टितम् । आविष्टितम् भवति । आविष्टितमित्या-विष्टितम् ।
भवत्येवम् । एवमिव । इव हि । हि पशुः । पशुरुल्बम् ।
उल्बमिव ( ) । इव चर्म । चर्मेव । इव माꣳसम् । माꣳसमिव ।
इवास्थि । अस्थीव । इव यावान् । यावानेव । एव पशुः । पशुस्तम् ।
तमाप्त्वा । आप्त्वा ऽव । अव रुन्धे । रुन्धे यस्य । यस्यैषा । एषा यज्ञे ।
यज्ञे प्रायश्चित्तिः । प्रायश्चित्तिः क्रियते । क्रियत इष्ट्वा । इष्ट्वा
वसीयान् । वसीयान् भवति । भवतीति भवति ॥ **4** (**71/83**)

***(वर्तयेत्याह-न इति-वै नाभ्या-उल्बमिवै-कविꣳशतिश्च) (A1)***

**T.S.3.4.2.1 - Kramam**

आ वायो । वायो भूष । वायो इति वायो । भूष शुचिपाः ।
शुचिपा उप । शुचिपा इति शुचि - पाः । उप नः । नः सहस्रम् ।

सहस्रम् ते । ते नियुतः । नियुतो विश्ववार । नियुत इति नि–युतः ।
विश्ववारेति विश्व – वार ॥ उपो ते । उपो इत्युपो । ते अन्धः ।
अन्धो मद्यम् । मद्यमयामि । अयामि यस्य । यस्य देव । देव दधिषे ।
दधिषे पूर्वपेयम् । पूर्वपेयमिति पूर्व – पेयम् ॥ आकूत्यै त्वा ।
आकूत्या इत्या – कूत्यै । त्वा कामाय । कामाय त्वा । त्वा समृधे ।
समृधे त्वा । समृध इति सम् – ऋधे । त्वा किक्किटा ।
किक्किटा ते । ते मनः । मनः प्रजापतये । प्रजापतये स्वाहा ।
प्रजापतय इति प्रजा – पतये । स्वाहा किक्किटा । किक्किटा ते ।
ते प्राणम् । प्राणँ वायवे । प्राणमिति प्र – अनम् । वायवे स्वाहा ।
स्वाहा किक्किटा । किक्किटा ते । ते चक्षुः । चक्षुः सूर्याय ।
सूर्याय स्वाहा । स्वाहा किक्किटा । किक्किटा ते । ते श्रोत्रम् । श्रोत्रम्
द्यावापृथिवीभ्याम् । द्यावापृथिवीभ्या॑ स्वाहा । द्यावापृथिवीभ्यामिति
द्यावा – पृथिवीभ्याम् । स्वाहा किक्किटा । किक्किटा ते । ते वाचम् ।
वाच॑ सरस्वत्यै । सरस्वत्यै स्वाहा । स्वाहा त्वम् । **5** (**50/59**)

**T.S.3.4.2.2 - Kramam**

त्वम् तुरीया । तुरीया वशिनी । वशिनी वशा । वशा ऽसि ।

असि सकृत् । सकृद् यत् । यत् त्वा । त्वा मनसा । मनसा गर्भः ।

गर्भ आ । आ ऽशयत् । अशयदित्यशयत् ॥ वशा त्वम् । त्वं ँवशिनी ।

वशिनी गच्छ । गच्छ देवान् । देवान्थ् सत्याः । सत्याः सन्तु । सन्तु

यजमानस्य । यजमानस्य कामाः । कामा इति कामाः ॥ अजा ऽसि ।

असि रयिष्ठा । रयिष्ठा पृथिव्याम् । रयिष्ठेति रयि – स्था । पृथिव्या ँ

सीद । सीदोर्द्ध्वा । ऊर्द्ध्वा ऽन्तरिक्षम् । अन्तरिक्षमुप । उप तिष्ठस्व ।

तिष्ठस्व दिवि । दिवि ते । ते बृहत् । बृहद् भाः । भा इति भाः ॥

तन्तुम् तन्वन्न् । तन्वन् रजसः । रजसो भानुम् । भानुमनु । अन्विहि ।

इहि ज्योतिष्मतः । ज्योतिष्मतः पथः । पथो रक्ष । रक्ष धिया ।

धिया कृतान् । कृतानिति कृतान् ॥ अनुल्बणं ँवयत । वयत जोगुवाम् ।

जोगुवामपः । अपो मनुः ( ) । मनुर् भव । भव जनय । जनया

दैव्यम् । दैव्यम् जनम् । जनमिति जनम् ॥ मनसो हविः । हविरसि ।

असि प्रजापतेः । प्रजापतेर् वर्णः । प्रजापतेरिति प्रजा – पतेः ।

वर्णो गात्राणाम् । गात्राणाम् ते । ते गात्रभाजः । गात्रभाजो भूयास्म ।

गात्रभाज इति गात्र – भाजः । भूयास्मेति भूयास्म ॥ 6 (63/66)

*(सरस्वत्यै स्वाहा – मनु – स्त्रयोदश च) (A2)*

**T.S.3.4.3.1 - Kramam**

इमे वै । इमे इतीमे । वै सह । सहास्ताम् । आस्ताम् ते ।

ते वायुः । ते इति ते । वायुर् वि । व्यवात् । अवात् ते । ते गर्भम् ।

ते इति ते । गर्भमदधाताम् । अदधाताम् तम् । त७ं सोमः ।

सोमः प्र । प्राजनयत् । अजनयदग्निः । अग्निरग्रसत । अग्रसत सः ।

स एतम् । एतम् प्रजापतिः । प्रजापतिराग्नेयम् । प्रजापतिरिति

प्रजा – पतिः । आग्नेयमष्टाकपालम् । अष्टाकपालमपश्यत् ।

अष्टाकपालमित्यष्टा – कपालम् । अपश्यत् तम् । तम् निः । निरवपत् ।

अवपत् तेन । तेनैव । एवैनाम् । एनामग्नेः । अग्नेरधि । अधि निः ।

निरक्रीणात् । अक्रीणात् तस्मात् । तस्मादपि । अप्यन्यदेवत्याम् ।

अन्यदेवत्यामालभमानः । अन्यदेवत्यामित्यन्य – देवत्याम् ।

आलभमान आग्नेयम् । आलभमान इत्या – लभमानः ।

आग्नेयमष्टाकपालम् । अष्टाकपालम् पुरस्तात् ।

अष्टाकपालमित्यष्टा – कपालम् । पुरस्तान् निः । निर् वपेत् ।

वपेदग्नेः । अग्नेरेव । एवैनाम् । एनामधि । अधि निष्क्रीय ।
निष्क्रीया । निष्क्रीयेति निः - क्रीय । आ लभते । लभते यत् ।
यद् वायुः । 7 (50/59)

**T.S.3.4.3.2 - Kramam**

वायुर् व्यवात् । व्यवात् तस्मात् । व्यवादिति वि - अवात् ।
तस्माद् वायव्या । वायव्या यत् । यदिमे । इमे गर्भम् । इमे इतीमे ।
गर्भमदधाताम् । अदधाताम् तस्मात् । तस्माद् द्यावापृथिव्या ।
द्यावापृथिव्या यत् । द्याव्यापृथिव्येति द्यावा - पृथिव्या । यथ् सोमः ।
सोमः प्र । प्राजनयत् । अजनयदग्निः । अग्निरग्रसत ।
अग्रसत तस्मात् । तस्मादग्नीषोमीया । अग्नीषोमीया यत् ।
अग्नीषोमीयेत्यग्नी - सोमीया । यदनयोः । अनयोर् वियत्योः ।
वियत्योर् वाक् । वियत्योरिति वि - यत्योः । वागवदत् । अवदत्
तस्मात् । तस्माथ् सारस्वती । सारस्वती यत् । यत् प्रजापतिः ।
प्रजापतिरग्नेः । प्रजापतिरिति प्रजा - पतिः । अग्नेरधि । अधि
निरक्रीणात् । निरक्रीणात् तस्मात् । निरक्रीणादिति निः-अक्रीणात् ।
तस्मात् प्राजापत्या । प्राजापत्या सा । प्राजापत्येति प्राजा - पत्या ।

सा वै । वा एषा । एषा सर्वदेवत्या । सर्वदेवत्या यत् । सर्वदेवत्येति सर्व–देवत्या । यदजा । अजा वशा । वशा वायव्याम् । वायव्यामा । आ लभेत । लभेत भूतिकामः । भूतिकामो वायुः । भूतिकाम इति भूति – कामः । वायुर् वै । वै क्षेपिष्ठा । क्षेपिष्ठा देवता । देवता वायुम् । वायुमेव । एव स्वेन । स्वेन भागधेयेन । **8 (50/60)**

**T.S.3.4.3.3 - Kramam**

भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव । एवैनम् । एनम् भूतिम् । भूतिम् गमयति । गमयति द्यावापृथिव्याम् । द्यावापृथिव्यामा । द्यावापृथिव्यामिति द्यावा – पृथिव्याम् । आ लभेत । लभेत कृषमाणः । कृषमाणः प्रतिष्ठाकामः । प्रतिष्ठाकामो दिवः । प्रतिष्ठाकाम इति प्रतिष्ठा–कामः । दिव एव । एवास्मै । अस्मै पर्जन्यः । पर्जन्यो वर्.षति । वर्.षति वि । व्यस्याम् । अस्यामोषधयः । ओषधयो रोहन्ति । रोहन्ति समर्द्धुकम् । समर्द्धुकमस्य । समर्द्धुकमिति सम् – अर्द्धुकम् । अस्य सस्यम् । सस्यम् भवति । भवत्यग्नीषोमीयाम् । अग्नीषोमीयामा । अग्नीषोमीयामित्यग्नी – सोमीयाम् । आ लभेत ।

लभेत यः । यः कामयेत । कामयेतान्नवान् । अन्नवानन्नादः ।
अन्नवानित्यन्न – वान् । अन्नादः स्याम् । अन्नाद इत्यन्न – अदः ।
स्यामिति । इत्यग्निना । अग्निनैव । एवान्नम् । अन्नमव । अव रुन्धे ।
रुन्धे सोमेन । सोमेनान्नाद्यम् । अन्नाद्यमन्नवान् ।
अन्नाद्यमित्यन्न – अद्यम् । अन्नवानेव । अन्नवानित्यन्न – वान् ।
एवान्नादः । अन्नादो भवति । अन्नाद इत्यन्न – अदः ।
भवति सारस्वतीम् । सारस्वतीमा । आ लभेत ।
लभेत यः । य ईश्वरः । **9** **(50/60)**

**<u>T.S.3.4.3.4 - Kramam</u>**

ईश्वरो वाचः । वाचो वदितोः । वदितोः सन्न् । सन् वाचम् ।
वाचम् न । न वदेत् । वदेद् वाक् । वाग् वै । वै सरस्वती ।
सरस्वती सरस्वतीम् । सरस्वतीमेव । एव स्वेन ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सा । सैव । एवास्मिन्न् । अस्मिन् वाचम् ।
वाचम् दधाति । दधाति प्राजापत्याम् । प्राजापत्यामा ।
प्राजापत्यामिति प्राजा – पत्याम् । आ लभेत । लभेत यः ।

यः कामयेत । कामयेतानभिजितम् । अनभिजितमभि ।
अनभिजितमित्यनभि - जितम् । अभि जयेयम् । जयेयमिति ।
इति प्रजापतिः । प्रजापतिः सर्वाः । प्रजापतिरिति प्रजा - पतिः ।
सर्वा देवताः । देवता देवताभिः । देवताभिरेव । एवानभिजितम् ।
अनभिजितमभि । अनभिजितमित्यनभि - जितम् । अभि जयति ।
जयति वायव्यया । वायव्ययोपाकरोति । उपाकरोति वायोः ।
उपाकरोतीत्युप - आकरोति । वायोरेव । एवैनाम् । एनामवरुद्ध्य ।
अवरुद्ध्या । अवरुद्ध्येत्यव-रुद्ध्य । आ लभते । लभत आकूत्यै ।
आकूत्यै त्वा । आकूत्या इत्या - कूत्यै । त्वा कामाय ।
कामाय त्वा । त्वेति । **10 (50/58)**

**T.S.3.4.3.5 - Kramam**

इत्याह । आह यथायजुः । यथायजुरेव । यथायजुरिति यथा-यजुः ।
एवैतत् । एतत् किक्किटाकारम् । किक्किटाकारम् जुहोति ।
किक्किटाकारमिति किक्किटा - कारम् । जुहोति किक्किटाकारेण ।
किक्किटाकारेण वै । किक्किटाकारेणेति किक्किटा - कारेण ।
वै ग्राम्याः । ग्राम्याः पशवः । पशवो रमन्ते । रमन्ते प्र । प्रारण्याः ।

आरण्याः पतन्ति । पतन्ति यत् । यत् किक्किटाकारम् । किक्किटाकारम्
जुहोति । किक्किटाकारमिति किक्किटा–कारम् । जुहोति ग्राम्याणाम् ।
ग्राम्याणाम् पशूनाम् । पशूनाम् धृत्यै । धृत्यै पर्यग्नौ । पर्यग्नौ
क्रियमाणे । पर्यग्नाविति परि – अग्नौ । क्रियमाणे जुहोति ।
जुहोति जीवन्तीम् । जीवन्तीमेव । एवैनाम् । एना॒ँ सुवर्गम् ।
सुवर्गं ँल्लोकम् । सुवर्गमिति सुवः – गम् । लोकम् गमयति ।
गमयति त्वम् । त्वम् तुरीया । तुरीया वशिनी । वशिनी वशा ।
वशा ऽसि । असीति । इत्याह । आह देवत्रा । देवत्रैव । देवत्रेति
देव – त्रा । एवैनाम् । एनाम् गमयति । गमयति सत्याः । सत्याः
सन्तु । सन्तु यजमानस्य । यजमानस्य कामाः । कामा इति । इत्याह ।
आहैषः । एष वै । वै कामः । कामो यजमानस्य । **11 (50/57)**

**<u>T.S.3.4.3.6 - Kramam</u>**

यजमानस्य यत् । यदनार्तः । अनार्त उदृचम् । उदृचम् गच्छति ।
उदृचमित्युत् – ऋचम् । गच्छति तस्मात् । तस्मादेवम् । एवमाह ।
आहाजा । अजा ऽसि । असि रयिष्ठा । रयिष्ठेति ।

रयिष्ठेति रयि - स्था । इत्याह । आहैषु । एष्वेव । एवैनाम् । एनां ँलोकेषु । लोकेषु प्रति । प्रति ष्ठापयति । स्थापयति दिवि । दिवि ते । ते बृहत् । बृहद् भाः । भा इति । इत्याह । आह सुवर्गे । सुवर्ग एव । सुवर्ग इति सुवः - गे । एवास्मै । अस्मै लोके । लोके ज्योतिः । ज्योतिर् दधाति । दधाति तन्तुम् । तन्तुम् तन्वन्न् । तन्वन् रजसः । रजसो भानुम् । भानुमनु । अन्विहि । इहीति । इत्याह । आहेमान् । इमानेव । एवास्मै । अस्मै लोकान् । लोकान् ज्योतिष्मतः । ज्योतिष्मतः करोति । करोत्यनुल्बणम् । अनुल्बणं ँवयत । वयत जोगुवाम् । जोगुवामपः । अप इति । इत्याह । 12 (50/53)

**T.S.3.4.3.7 - Kramam**

आह यत् । यदेव । एव यज्ञे । यज्ञ उल्बणम् । उल्बणम् क्रियते । क्रियते तस्य । तस्यैव । एवैषा । एषा शान्तिः । शान्तिर् मनुः । मनुर् भव । भव जनय । जनया दैव्यम् । दैव्यम् जनम् । जनमिति । इत्याह । आह मानव्यः । मानव्यो वै । वै प्रजाः । प्रजा स्ताः । प्रजा इति प्र - जाः । ता एव । एवाद्याः । आद्याः कुरुते ।

कुरुते मनसः । मनसो हविः । हविरसि । असीति । इत्याह ।

आह स्वगाकृत्यै । स्वगाकृत्यै गात्राणाम् । स्वगाकृत्या इति

स्वगा - कृत्यै । गात्राणाम् ते । ते गात्रभाजः । गात्रभाजो भूयास्म ।

गात्रभाज इति गात्र - भाजः । भूयास्मेति । इत्याह । आहाशिषम् ।

आशिषमेव । आशिषमित्या - शिषम् । एवैताम् । एतामा ।

आ शास्ते । शास्ते तस्यै । तस्यै वै । वा एतस्याः । एतस्या एकम् ।

एकमेव । एवादेवयजनम् । अदेवयजनं ँयत् ।

अदेवयजनमित्यदेव-यजनम् । यदालब्धायाम् । आलब्धायामभ्रः ( ) ।

आलब्धायामित्या - लब्धायाम् । अभ्रो भवति । **13** (**50/56**)

**<u>T.S.3.4.3.8 - Kramam</u>**

भवति यत् । यदालब्धायाम् । आलब्धायामभ्रः ।

आलब्धायामित्या - लब्धायाम् । अभ्रः स्यात् । स्यादफ्सु ।

अफ्सु वा । अफ्स्वित्यप् - सु । वा प्रवेशयेत् । प्रवेशयेथ् सर्वाम् ।

प्रवेशयेदिति प्र - वेशयेत् । सर्वां ँवा । वा प्र । प्राश्ञीयात् ।

अश्ञीयाद् यत् । यदफ्सु । अफ्सु प्रवेशयेत् । अफ्स्वित्यप् - सु ।

प्रवेशयेद् यज्ञवेशसम् । प्रवेशयेदिति प्र – वेशयेत् । यज्ञवेशसम्
कुर्यात् । यज्ञवेशसमिति यज्ञ – वेशसम् । कुर्याथ् सर्वाम् ।
सर्वामेव । एव प्र । प्राश्ञीयात् । अश्ञीयादिन्द्रियम् । इन्द्रियमेव ।
एवात्मन्न् । आत्मन् धत्ते । धत्ते सा । सा वै । वा एषा । एषा
त्रयाणाम् । त्रयाणामेव । एवावरुद्धा । अवरुद्धा सम्ँवथ्सरसदः ।
अवरुद्धेत्यव – रुद्धा । सम्ँवथ्सरसदः सहस्रयाजिनः ।
सम्ँवथ्सरसद इति सम्ँवथ्सर–सदः । सहस्रयाजिनो गृहमेधिनः ।
सहस्रयाजिन इति सहस्र – याजिनः । गृहमेधिनस्ते । गृहमेधिन
इति गृह–मेधिनः । त एव । एवैतया । एतया यजेरन्न् । यजेरन्
तेषाम् । तेषामेव । एवैषा । एषा ऽऽप्ता । आप्तेत्याप्ता ॥ **14** (**42/52**)

*(यथ् – स्वेन – सारस्वतीमा लभेत यः – कामाय त्वा – कामो – ऽप इत्य – श्रो – द्विचत्वारिꣳशच्च) (A3)*

**<u>T.S.3.4.4.1 - Kramam</u>**

चित्तम् च । च चित्तिः । चित्तिश्च । चाकूतम् । आकूतम् च ।
आकूतमित्या – कूतम् । चाकूतिः । आकूतिश्च ।
आकूतिरित्या – कूतिः । च विज्ञातम् । विज्ञातम् च ।

विज्ञातमिति वि – ज्ञातम् । च विज्ञानम् । विज्ञानं च । विज्ञानमिति

वि – ज्ञानम् । च मनः । मनश्च । च शक्वरीः । शक्वरीश्च ।

च दर्.शः । दर्.शश्च । च पूर्णमासः । पूर्णमासश्च । पूर्णमास इति

पूर्ण – मासः । च बृहत् । बृहच् च । च रथन्तरम् । रथन्तरम् च ।

रथन्तरमिति रथं – तरम् । च प्रजापतिः । प्रजापतिर् जयान् ।

प्रजापतिरिति प्रजा–पतिः । जयानिन्द्राय । इन्द्राय वृष्णे । वृष्णे प्र ।

प्रायच्छत् । अयच्छदुग्रः । उग्रः पृतनाज्येषु । पृतनाज्येषु तस्मै ।

तस्मै विशः । विशः सम् । समनमन्त । अनमन्त सर्वाः ।

सर्वाः सः । स उग्रः । उग्रः सः । स हि । हि हव्यः । हव्यो बभूव ।

बभूव देवासुराः । देवासुराः सम्ँयत्ताः । देवासुरा इति

देव – असुराः । सम्ँयत्ता आसन्न् । सम्ँयत्ता इति सं – यत्ताः ।

आसन्थ् सः । स इन्द्रः । इन्द्रः प्रजापतिम् । प्रजापतिमुप ( ) ।

प्रजापतिमिति प्रजा – पतिम् । उपाधावत् । अधावत् तस्मै । तस्मा

एतान् । एतान् जयान् । जयान् प्र । प्रायच्छत् । अयच्छत् तान् ।

तानजुहोत् । अजुहोत् ततः । ततो वै । वै देवाः । देवा असुरान् ।

असुरानजयन्न् । अजयन्. यत् । यदजयन्न् । अजयन् तत् ।

तज् जयानाम् । जयानाम् जयत्वम् । जयत्व७ स्पर्द्धमानेन ।

जयत्वमिति जय – त्वम् । स्पर्द्धमानेनैते । एते होतव्याः ।

होतव्या जयति । जयत्येव । एव ताम् । ताम् पृतनाम् ।

पृतनामिति पृतनाम् ॥ **15** (**75/86**)

*(उप – पञ्चविं॰शतिश्च) (A4)*

**T.S.3.4.5.1 - Kramam**

अग्निर् भूतानाम् । भूतानामधिपतिः । अधिपतिः सः ।

अधिपतिरित्यधि–पतिः । स मा । मा ऽवतु । अवत्विन्द्रः ।

इन्द्रो ज्येष्ठानाम् । ज्येष्ठानां ँयमः । यमः पृथिव्याः । पृथिव्या वायुः ।

वायुरन्तरिक्षस्य । अन्तरिक्षस्य सूर्यः । सूर्यो दिवः । दिवश्चन्द्रमाः ।

चन्द्रमा नक्षत्राणाम् । नक्षत्राणाम् बृहस्पतिः । बृहस्पतिर् ब्रह्मणः ।

ब्रह्मणो मित्रः । मित्रः सत्यानाम् । सत्यानां ँवरुणः । वरुणो ऽपाम् ।

अपा॰ं समुद्रः । समुद्रः स्रोत्यानाम् । स्रोत्यानामन्नम् ।

अन्न॰ं साम्राज्यानाम् । साम्राज्यानामधिपति । साम्राज्यानामिति

साम् – राज्यानाम् । अधिपति तत् । अधिपतीत्यधि – पति । तन्मा ।

मा ऽवतु । अवतु सोमः । सोम ओषधीनाम् । ओषधीनाꣳ सविता ।
सविता प्रसवानाम् । प्रसवानाꣳ रुद्रः । प्रसवानामिति प्र – सवानाम् ।
रुद्रः पशूनाम् । पशूनाम् त्वष्टा । त्वष्टा रूपाणाम् । रूपाणां ँविष्णुः ।
विष्णुः पर्वतानाम् । पर्वतानां मरुतः । मरुतो गणानाम् ।
गणानामधिपतयः । अधिपतयस्ते । अधिपतय इत्यधि–पतयः । ते मा ।
मा ऽवन्तु । अवन्तु पितरः । पितरः पितामहाः । पितामहाः परे ।
परे ऽवरे ( ) । अवरे ततः । तताः ततामहाः । ततामहा इह । इह मा ।
मा ऽवत । अवतेत्यवत ॥ अस्मिन् ब्रह्मन्न् । ब्रह्मन्नस्मिन्न् ।
अस्मिन् क्षत्रे । क्षत्रे ऽस्याम् । अस्यामाशिषि । आशिष्यस्याम् ।
आशिषीत्या – शिषि । अस्याम् पुरोधायाम् । पुरोधायामस्मिन्न् ।
पुरोधायामिति पुरः – धायाम् । अस्मिन् कर्मन्न् । कर्मन्नस्याम् ।
अस्याम् देवहूत्याम् । देवहूत्यामिति देव – हूत्याम् ॥ **16** (**67/74**)

*(अवरे – सप्तदश च) (A5)*

**T.S.3.4.6.1 - Kramam**

देवा वै । वै यत् । यद् यज्ञे । यज्ञे ऽकुर्वत । अकुर्वत तत् ।
तदसुराः । असुरा अकुर्वत । अकुर्वत ते । ते देवाः । देवा एतान् ।

एतानभ्यातानान् । अभ्यातानानपश्यन्न् ।

अभ्यातानानित्यभि - आतानान् । अपश्यन् तान् । तानभ्यातन्वत ।

अभ्यातन्वत यत् । अभ्यातन्वतेत्यभि - आतन्वत । यद् देवानाम् ।

देवानाम् कर्म । कर्मासीत् । आसीदार्द्ध्यत । आर्द्ध्यत तत् । तद् यत् ।

यदसुराणाम् । असुराणाम् न । न तत् । तदार्द्ध्यत । आर्द्ध्यत येन ।

येन कर्मणा । कर्मणेर्त्सेत् । ईर्त्सेत् तत्र । तत्र होतव्याः । होतव्या

ऋद्ध्नोति । ऋद्ध्नोत्येव । एव तेन । तेन कर्मणा । कर्मणा यत् ।

यद् विश्वे । विश्वे देवाः । देवाः समभरन्न् । समभरन् तस्मात् ।

समभरन्निति सं-अभरन्न् । तस्मादभ्याताना: । अभ्याताना वैश्वदेवाः ।

अभ्याताना इत्यभि - आतानाः । वैश्वदेवा यत् । वैश्वदेवा इति

वैश्व - देवाः । यत् प्रजापतिः । प्रजापतिर् जयान् ।

प्रजापतिरितिप्रजा - पतिः । जयान् प्र । प्रायच्छत् । अयच्छत्

तस्मात् । तस्माज् जयाः । जयाः प्राजापत्याः । प्राजापत्या यत् ।

प्राजापत्या इति प्राजा - पत्याः । **17 (50/57)**

**T.S.3.4.6.2 - Kramam**

यद् राष्ट्रभृद्भिः । राष्ट्रभृद्भी राष्ट्रम् । राष्ट्रभृद्भिरिति राष्ट्रभृत्-भिः । राष्ट्रमा । आ ऽददत । अददत तत् । तद् राष्ट्रभृताम् । राष्ट्रभृता॑ राष्ट्रभृत्त्वम् । राष्ट्रभृतामिति राष्ट्र - भृताम् । राष्ट्रभृत्त्वम् ते । राष्ट्रभृत्त्वमिति राष्ट्रभृत् - त्वम् । ते देवाः । देवा अभ्यातानैः । अभ्यातानैरसुरान् । अभ्यातानैरित्यभि-आतानैः । असुरानभ्यातन्वत । अभ्यातन्वत जयैः । अभ्यातन्वतेत्यभि - आतन्वत । जयै रजयन्न् । अजयन् राष्ट्रभद्भिः । राष्ट्रभृद्भी राष्ट्रम् । राष्टभृद्भिरिति राष्ट्रभृत् - भिः । राष्ट्रमा । आ ऽददत । अददत यत् । यद् देवाः । देवा अभ्यातानैः । अभ्यातानैरसुरान् । अभ्यातानैरित्यभि-आतानैः । असुरानभ्यातन्वत । अभ्यातन्वत तत् । अभ्यातन्वतेत्यभि-आतन्वत । तदभ्यातानानाम् । अभ्यातानानामभ्यातानत्वम् । अभ्यातानानामित्यभि - आतानानाम् । अभ्यातानत्वं ँयत् । अभ्यातानत्वमित्यभ्यातान - त्वम् । यज् जयैः । जयैरजयन्न् । अजयन् तत् । तज् जयानाम् । जयानाम् जयत्वम् । जयत्वं ँयत् । जयत्वमिति जय - त्वम् । यद् राष्ट्रभृद्भिः । राष्ट्रभृद्भी राष्ट्रम् ।

राष्ट्रभृद्भिरिति राष्ट्रभृत् – भिः । राष्ट्रमा । आ ऽददत । अददत तत् । तद् राष्ट्रभृताम् । राष्ट्रभृताꣳ राष्ट्रभृत्वम् । राष्ट्रभृतामिति राष्ट्र–भृताम् । राष्टभृत्वम् ततः । राष्ट्रभृत्वमिति राष्ट्रभृत् – त्वम् । ततो देवाः । देवा अभवन्न् । अभवन् परा । परा ऽसुराः । असुरा यः । यो भ्रातृव्यवान् । भ्रातृव्यवान्थ् स्यात् । भ्रातृव्यवानिति भ्रातृव्य – वान् । स्याथ् सः ( ) । स एतान् । एतान् जुहुयात् । जुहुयादभ्यातानैः । अभ्यातानैरेव । अभ्यातानैरित्यभि – आतानैः । एव भ्रातृव्यान् । भ्रातृव्यानभ्यातनुते । अभ्यातनुते जयैः । अभ्यातनुत इत्यभि – आतनुते । जयैर् जयति । जयति राष्ट्रभृद्भिः । राष्ट्रभृद्भी राष्ट्रम् । राष्ट्रभृद्भिरिति राष्ट्रभृत् – भिः । राष्टमा । आ दत्ते । दत्ते भवति । भवत्यात्मना । आत्मना परा । परा ऽस्य । अस्य भ्रातृव्यः । भ्रातृव्यो भवति । भवतीति भवति ॥ **18** (**68/86**)

*(प्राजापत्याः – सोऽऽ – ष्टादश च) (A6)*

**T.S.3.4.7.1 - Kramam**

ऋताषाड् ऋतधामा । ऋतधामा ऽग्निः । ऋतधामेत्यृत – धामा । अग्निर् गन्धर्वः । गन्धर्वस्तस्य । तस्यौषधयः ।

ओषधयो ऽफ्सरसः । अफ्सरस ऊर्जः । ऊर्जो नाम । नाम सः ।
स इदम् । इदम् ब्रह्म । ब्रह्म क्षत्रम् । क्षत्रम् पातु । पातु ताः ।
ता इदम् । इदम् ब्रह्म । ब्रह्म क्षत्रम् । क्षत्रम् पान्तु । पान्तु तस्मै ।
तस्मै स्वाहा । स्वाहा ताभ्यः । ताभ्यः स्वाहा । स्वाहा स(गं)हितः ।
स(गं)हितो विश्वसामा । स(गं)हित इति सं-हितः । विश्वसामा सूर्यः ।
विश्वसामेति विश्व - सामा । सूर्यो गन्धर्वः । गन्धर्वस्तस्य ।
तस्य मरीचयः । मरीचयो ऽफ्सरसः । अफ्सरस आयुवः ।
आयुवः सुषुम्नः । आयुव इत्या - युवः । सुषुम्नः सूर्यरश्मिः ।
सुषुम्न इति सु - सुम्नः । सूर्यरश्मि श्चन्द्रमाः । सूर्यरश्मिरिति
सूर्य - रश्मिः । चन्द्रमा गन्धर्वः । गन्धर्वस्तस्य । तस्य नक्षत्राणि ।
नक्षत्राण्यफ्सरसः । अफ्सरसो बेकुरयः । बेकुरयो भुज्युः । भुज्युः
सुपर्णः । सुपर्णो यज्ञः । सुपर्ण इति सु - पर्णः । यज्ञो गन्धर्वः ।
गन्धर्वस्तस्य । तस्य दक्षिणाः । दक्षिणा अफ्सरसः । अफ्सरसः
स्तवाः । स्तवाः प्रजापतिः । प्रजापतिर् विश्वकर्मा ।

प्रजापतिरिति प्रजा – पतिः । विश्वकर्मा मनः ।
विश्वकर्मेति विश्व – कर्मा । मनो गन्धर्वः । **19 (50/59)**

**T.S.3.4.7.2 - Kramam**

गन्धर्वस्तस्य । तस्यर्.ख्सामानि । ऋख्सामान्यफ्सरसः ।
ऋख्सामानीत्यृक् – सामानि । अफ्सरसो वह्नयः । वह्नय इषिरः ।
इषिरो विश्वव्यचाः । विश्वव्यचा वातः । विश्वव्यचा इति
विश्व – व्यचाः । वातो गन्धर्वः । गन्धर्वस्तस्य । तस्यापः ।
आपोऽफ्सरसः । अफ्सरसो मुदाः । मुदा भुवनस्य । भुवनस्य पते ।
पते यस्य । यस्य ते । त उपरि । उपरि गृहाः । गृहा इह । इह च ।
चेति च ॥ स नः । नो रास्व । रास्वाज्यानिम् । अज्यानिँ रायः ।
रायस्पोषम् । पोषँ सुवीर्यम् । सुवीर्यँ सम्ँवथ्सरीणाम् ।
सुवीर्यमिति सु – वीर्यम् । सम्ँवथ्सरीणाँ स्वस्तिम् ।
सम्ँवथ्सरीणामिति सम् – वथ्सरीणाम् । स्वस्तिमिति स्वस्तिम् ॥
परमेष्ठ्यधिपतिः । अधिपतिर् मृत्युः । अधिपतिरित्यधि – पतिः ।
मृत्युर् गन्धर्वः । गन्धर्वस्तस्य । तस्य विश्वम् । विश्वमफ्सरसः ।
अफ्सरसो भुवः । भुवः सुक्षितिः । सुक्षितिः सुभूतिः ।

सुक्षितिरिति सु – क्षितिः । सुभूतिर् भद्रकृत् । सुभूतिरिति सु – भूतिः । भद्रकृथ् सुवर्वान् । भद्रकृदिति भद्र – कृत् । सुवर्वान् पर्जन्यः । सुवर्वानिति सुवः – वान् । पर्जन्यो गन्धर्वः । गन्धर्वस्तस्य । तस्य विद्युतः । विद्युतो ऽप्सरसः । विद्युत इति वि – द्युतः । अप्सरसो रुचः । रुचो दूरेहेतिः । दूरेहेतिरमृडयः ( ) । दूरेहेतिरिति दूरे – हेतिः । अमृडयो मृत्युः । **20** (**50/61**)

**T.S.3.4.7.3 - Kramam**

मृत्युर् गन्धर्वः । गन्धर्वस्तस्य । तस्य प्रजाः । प्रजा अप्सरसः । प्रजा इति प्र – जाः । अप्सरसो भीरुवः । भीरुवश्चारुः । चारुः कृपणकाशी । कृपणकाशी कामः । कृपणकाशीति कृपण–काशी । कामो गन्धर्वः । गन्धर्वस्तस्य । तस्याधयः । आधयो ऽप्सरसः । आधय इत्या – धयः । अप्सरसः शोचयन्तीः । शोचयन्तीर् नाम । नाम सः । स इदम् । इदम् ब्रह्म । ब्रह्म क्षत्रम् । क्षत्रम् पातु । पातु ताः । ता इदम् । इदम् ब्रह्म । ब्रह्म क्षत्रम् । क्षत्रम् पान्तु । पान्तु तस्मै । तस्मै स्वाहा । स्वाहा ताभ्यः । ताभ्यः स्वाहा । स्वाहा सः । स नः । नो भुवनस्य । भुवनस्य पते । पते यस्य ।

यस्य ते । त उपरि । उपरि गृहाः । गृहा इह । इह च । चेति च ॥

उरु ब्रह्मणे । ब्रह्मणे ऽस्मै । अस्मै क्षत्राय । क्षत्राय महि ।

महि शर्म । शर्म यच्छ । यच्छेति यच्छ ॥ **21** (**46/49**)

*(मनो – ऽमृडयः – षट्चत्वारिꣳशच्च) (A7)*

**T.S.3.4.8.1 - Kramam**

राष्ट्रकामाय होतव्याः । राष्ट्रकामायेति राष्ट्र–कामाय । होतव्या राष्ट्रम् ।

राष्ट्रं वै । वै राष्ट्रभृतः । राष्ट्रभृतो राष्ट्रेण । राष्ट्रभृत इति राष्ट्र–भृतः ।

राष्ट्रेणैव । एवास्मै । अस्मै राष्ट्रम् । राष्ट्रमव । अव रुन्धे । रुन्धे

राष्ट्रम् । राष्ट्रमेव । एव भवति । भवत्यात्मने । आत्मने होतव्याः ।

होतव्या राष्ट्रम् । राष्ट्रं वै । वै राष्ट्रभृतः । राष्ट्रभृतो राष्ट्रम् । राष्ट्रभृत

इति राष्ट्र – भृतः । राष्ट्रम् प्रजा । प्रजा राष्ट्रम् । प्रजेति प्र – जा ।

राष्ट्रम् पशवः । पशवो राष्ट्रम् । राष्ट्रं यत् । यच्छ्रेष्ठः । श्रेष्ठो भवति ।

भवति राष्ट्रेण । राष्ट्रेणैव । एव राष्ट्रम् । राष्ट्रमव । अव रुन्धे ।

रुन्धे वसिष्ठः । वसिष्ठः समानानाम् । समानानाम् भवति । भवति

ग्रामकामाय । ग्रामकामाय होतव्याः । ग्रामकामायेति ग्राम–कामाय ।

होतव्या राष्ट्रम् । राष्ट्रं वै । वै राष्ट्रभृतः । राष्ट्रभृतो राष्ट्रम् ।

राष्ट्रभृत इति राष्ट्र – भृतः । राष्ट्रꣳ सजाताः । सजाता राष्ट्रेण ।

सजाता इति स – जाताः । राष्ट्रेणैव । एवास्मै । अस्मै राष्ट्रम् ।

राष्ट्रꣳ सजातान् । सजातानव । सजातानिति स – जातान् ।

अव रुन्धे । रुन्धे ग्रामी । ग्राम्येव । **22** (**50/58**)

**T.S.3.4.8.2 - Kramam**

एव भवति । भवत्यधिदेवने । अधिदेवने जुहोति । अधिदेवन

इत्यधि – देवने । जुहोत्यधिदेवने । अधिदेवन एव । अधिदेवन

इत्यधि – देवने । एवास्मै । अस्मै सजातान् । सजातानव ।

सजातानिति स – जातान् । अव रुन्धे । रुन्धे ते । त एनम् ।

एनमवरुद्धाः । अवरुद्धा उप । अवरुद्धा इत्यव – रुद्धाः ।

उप तिष्ठन्ते । तिष्ठन्ते रथमुखे । रथमुख ओजस्कामस्य ।

रथमुख इतिरथ – मुखे । ओजस्कामस्य होतव्याः ।

ओजस्कामस्येत्योजः – कामस्य । होतव्या ओजः । ओजो वै ।

वै राष्ट्रभृतः । राष्ट्रभृत ओजः । राष्ट्रभृत इति राष्ट्र – भृतः ।

ओजो रथः । रथ ओजसा । ओजसैव । एवास्मै ।

अस्मा ओजः । ओजोऽव । अव रुन्धे । रुन्ध ओजस्वी ।

ओजस्व्येव । एव भवति । भवति यः । यो राष्ट्रात् । राष्ट्रादपभूतः ।
अपभूतः स्यात् । अपभूत इत्यप – भूतः । स्यात् तस्मै ।
तस्मै होतव्याः । होतव्या यावन्तः । यावन्तो ऽस्य । अस्य रथाः ।
रथाः स्युः । स्युस्तान् । तान् ब्रूयात् । ब्रूयाद् युङ्ध्वम् ।
युङ्ध्वमिति । इति राष्ट्रम् । राष्ट्रमेव । एवास्मै । अस्मै युनक्ति ।
युनक्त्याहुतयः । **23** (**50/58**)

**T.S.3.4.8.3 - Kramam**

आहुतयो वै । आहुतय इत्या – हुतयः । वा एतस्य ।
एतस्याक्लृप्ताः । अक्लृप्ता यस्य । यस्य राष्ट्रम् । राष्ट्रम् न ।
न कल्पते । कल्पते स्वरथस्य । स्वरथस्य दक्षिणम् । स्वरथस्येति
स्व – रथस्य । दक्षिणम् चक्रम् । चक्रम् प्रवृह्य । प्रवृह्य नाडीम् ।
प्रवृह्येति प्र – वृह्य । नाडीमभि । अभि जुहुयात् । जुहुयादाहुतीः ।
आहुतीरेव । आहुतीरित्या – हुतीः । एवास्य । अस्य कल्पयति ।
कल्पयति ताः । ता अस्य । अस्य कल्पमानाः । कल्पमाना राष्ट्रम् ।
राष्ट्रमनु । अनु कल्पते । कल्पते सङ्ग्रामे । सङ्ग्रामे सम्यँत्ते ।
सङ्ग्राम इति सं – ग्रामे । सम्यँत्ते होतव्याः ।

सम्ँयत्त इति सं - यत्ते । होतव्या राष्ट्रम् । राष्ट्रं ँवै । वै राष्ट्रभृतः ।
राष्ट्रभृतो राष्ट्रे । राष्ट्रभृत इति राष्ट्र - भृतः । राष्ट्रे खलु । खलु वै ।
वा एते । एते व्यायच्छन्ते । व्यायच्छन्ते ये । व्यायच्छन्त इति
वि - आयच्छन्ते । ये सङ्ग्रामम् । सङ्ग्राम॒ सम्ँयन्ति ।
सङ्ग्राममिति सम् - ग्रामम् । सम्ँयन्ति यस्य । सम्ँयन्तीति
सं-यन्ति । यस्य पूर्वस्य । पूर्वस्य जुह्वति । जुह्वति सः । स एव ।
एव भवति । भवति जयति । जयति तम् । त॒ सङ्ग्रामम् ।
सङ्ग्रामम् मान्धुकः । सङ्ग्राममिति सम् - ग्रामम् ।
मान्धुक इध्मः । इध्मो भवति । **24 (50/61)**

**T.S.3.4.8.4 - Kramam**

भवत्यङ्गाराः । अङ्गारा एव । एव प्रतिवेष्टमानाः । प्रतिवेष्टमाना
अमित्राणाम् । प्रतिवेष्टमाना इति प्रति - वेष्टमानाः । अमित्राणामस्य ।
अस्य सेनाम् । सेनाम् प्रति । प्रति वेष्टयन्ति । वेष्टयन्ति यः ।
य उन्माद्येत् । उन्माद्येत् तस्मै । उन्माद्येदित्युत् - माद्येत् ।
तस्मै होतव्याः । होतव्या गन्धर्वाप्सरसः । गन्धर्वाप्सरसो वै ।
गन्धर्वाप्सरस इति गन्धर्व - अप्सरसः । वा एतम् । एतमुत् ।

उन् मादयन्ति । मादयन्ति यः । य उन्माद्यति । उन्माद्यत्येते ।
उन्माद्यतीत्युत्–माद्यति । एते खलु । खलु वै । वै गन्धर्वाप्सरसः ।
गन्धर्वाप्सरसो यत् । गन्धर्वाप्सरस इति गन्धर्व – अप्सरसः ।
यद् राष्ट्रभृतः । राष्ट्रभृतस्तस्मै । राष्ट्रभृत इति राष्ट्र – भृतः ।
तस्मै स्वाहा । स्वाहा ताभ्यः । ताभ्यः स्वाहा । स्वाहेति ।
इति जुहोति । जुहोति तेन । तेनैव । एवैनान् । एनाञ्छमयति ।
शमयति नैयग्रोधः । नैयग्रोध औदुम्बरः । औदुम्बर आश्वत्थः ।
आश्वत्थः प्लाक्षः । प्लाक्ष इति । इतीद्ध्मः । इद्ध्मो भवति ।
भवत्येते । एते वै । वै गन्धर्वाप्सरसाम् । गन्धर्वाप्सरसाम् गृहाः ।
गन्धर्वाप्सरसामिति गन्धर्व – अप्सरसाम् । गृहाः स्वे । स्व एव ।
एवैनान् । एनानायतने । **25** (**50/61**)

**T.S.3.4.8.5 - Kramam**

आयतने शमयति । आयतन इत्या – यतने । शमयत्यभिचरता ।
अभिचरता प्रतिलोमम् । अभिचरतेत्यभि – चरता । प्रतिलोमꣳ
होतव्याः । प्रतिलोममिति प्रति – लोमम् । होतव्याः प्राणान् ।
प्राणानेव । प्राणानिति प्र – अनान् । एवास्य । अस्य प्रतीचः ।

प्रतीचः प्रति । प्रति यौति । यौति तम् । तम् ततः । ततो येन ।

येन केन । केन च । च स्तृणुते । स्तृणुते स्वकृते । स्वकृत इरिणे ।

स्वकृत इति स्व - कृते । इरिणे जुहोति । जुहोति प्रदरे ।

प्रदरे वा । प्रदर इति प्र - दरे । वैतत् । एतद् वै । वा अस्यै ।

अस्यै निर्.ऋतिगृहीतम् । निर्.ऋतिगृहीतम् निर्.ऋतिगृहीते ।

निर्.ऋतिगृहीतमिति निर्.ऋति - गृहीतम् । निर्.ऋतिगृहीत एव ।

निर्.ऋतिगृहीत इति निर्.ऋति-गृहीते । एवैनम् । एनम् निर्.ऋत्या ।

निर्.ऋत्या ग्राहयति । निर्.ऋत्येति निः - ऋत्या । ग्राहयति यत् ।

यद् वाचः । वाचः क्रूरम् । क्रूरम् तेन । तेन वषट् । वषट् करोति ।

करोति वाचः । वाच एव । एवैनम् । एनम् क्रूरेण । क्रूरेण प्र ।

प्र वृश्चति । वृश्चति ताजक् । ताजगार्तिम् । आर्तिमा । आर्च्छति ।

ऋच्छति यस्य । यस्य कामयेत । कामयेतान्नाद्यम् । अन्नाद्यमा ।

अन्नाद्यमित्यन्न - अद्यम् । **26 (50/57)**

**T.S.3.4.8.6 - Kramam**

आ ददीय । ददीयेति । इति तस्य । तस्य सभायाम् ।

सभायामुत्तानः । उत्तानो निपद्य । उत्तान इत्युत् - तानः ।

निपद्य भुवनस्य । निपद्येति नि – पद्य । भुवनस्य पते । पत इति ।
इति तृणानि । तृणानि सम् । सम् गृह्णीयात् । गृह्णीयात् प्रजापतिः ।
प्रजापतिर् वै । प्रजापतिरिति प्रजा – पतिः । वै भुवनस्य ।
भुवनस्य पतिः । पतिः प्रजापतिना । प्रजापतिनैव । प्रजापतिनेति
प्रजा – पतिना । एवास्य । अस्यान्नाद्यम् । अन्नाद्यमा ।
अन्नाद्यमित्यन्न – अद्यम् । आ दत्ते । दत्त इदम् । इदमहम् ।
अहममुष्य । अमुष्यामुष्यायणस्य । आमुष्यायणस्यान्नाद्यम् ।
अन्नाद्यꣳ हरामि । अन्नाद्यमित्यन्न – अद्यम् । हरामीति । इत्याह ।
आहान्नाद्यम् । अन्नाद्यमेव । अन्नाद्यमित्यन्न – अद्यम् । एवास्य ।
अस्य हरति । हरति षड्भिः । षड्भिर्. हरति । षड्भिरिति षट्–भिः ।
हरति षट् । षड् वै । वा ऋतवः । ऋतवः प्रजापतिना ।
प्रजापतिनैव । प्रजापतिनेति प्रजा–पतिना । एवास्य । अस्यान्नाद्यम् ।
अन्नाद्यमादाय । अन्नाद्यमित्यन्न – अद्यम् । आदायर्तवः ।
आदायेत्या – दाय । ऋतवो ऽस्मै । अस्मा अनु । अनु प्र ।
प्र यच्छन्ति । यच्छन्ति यः ( ) । **27 (50/60)**

**T.S.3.4.8.7 - Kramam**

यो ज्येष्ठबन्धुः । ज्येष्ठबन्धुरपभूतः । ज्येष्ठबन्धुरिति ज्येष्ठ - बन्धुः । अपभूतः स्यात् । अपभूत इत्यप-भूतः । स्यात् तम् । तꣳ स्थले । स्थले ऽवसाय्य । अवसाय्य ब्रह्मौदनम् । अवसाय्येत्यव - साय्य । ब्रह्मौदनम् चतुश्शरावम् । ब्रह्मौदनमिति ब्रह्म - ओदनम् । चतुश्शरावम् पक्त्वा । चतुश्शरावमिति चतुः - शरावम् । पक्त्वा तस्मै । तस्मै होतव्याः । होतव्या वर्ष्म । वर्ष्म वै । वै राष्ट्रभृतः । राष्ट्रभृतो वर्ष्म । राष्ट्रभृत इति राष्ट्र - भृतः । वर्ष्म स्थलम् । स्थलम् ँवर्ष्मणा । वर्ष्मणैव । एवैनम् । एनम् ँवर्ष्म । वर्ष्म समानानाम् । समानानाम् गमयति । गमयति चतुश्शरावः । चतुश्शरावो भवति । चतुश्शराव इति चतुः - शरावः । भवति दिक्षु । दिक्ष्वेव । एव प्रति । प्रति तिष्ठति । तिष्ठति क्षीरे । क्षीरे भवति । भवति रुचम् । रुचमेव । एवास्मिन्न् । अस्मिन् दधाति । दधात्युत् । उद्धरति । हरति शृतत्वाय । शृतत्वाय सर्पिष्वान् । शृतत्वायेति शृत - त्वाय । सर्पिष्वान् भवति । भवति मेद्ध्यत्वाय । मेद्ध्यत्वाय चत्वारः । मेद्ध्यत्वायेति मेद्ध्य - त्वाय ।

चत्वार आर्.षेयाः । आर्.षेयाः प्र । प्राश्ञन्ति । अश्ञन्ति दिशाम् । दिशामेव । एव ज्योतिषि । ज्योतिषि जुहोति ।

जुहोतीति जुहोति ॥ **28 (49/58)**

***(ग्रामी – युनक्ती – ध्मः – स्व एवैना – नन्नाद्यं – यँच्छन्त्ये – कान्नपञ्चाशच्च) (A8)***

**T.S.3.4.9.1 - Kramam**

देविका निः । निर् वपेत् । वपेत् प्रजाकामः । प्रजाकाम श्छन्दाꣳसि । प्रजाकाम इति प्रजा – कामः । छन्दाꣳसि वै । वै देविकाः । देविका श्छन्दाꣳसि । छन्दाꣳसीव । इव खलु । खलु वै । वै प्रजाः । प्रजा श्छन्दोभिः । प्रजा इति प्र – जाः । छन्दोभिरेव । छन्दोभिरिति छन्दः – भिः । एवास्मै । अस्मै प्रजाः । प्रजाः प्र । प्रजा इति प्र – जाः । प्र जनयति । जनयति प्रथमम् । प्रथमम् धातारम् । धातारम् करोति । करोति मिथुनी । मिथुनी एव । एव तेन । तेन करोति । करोत्यनु । अन्वेव । एवास्मै । अस्मा अनुमतिः । अनुमतिर् मन्यते । अनुमतिरित्यनु – मतिः । मन्यते राते । राते राका । राका प्र । प्र सिनीवाली ।

सिनीवाली जनयति । जनयति प्रजासु । प्रजास्वेव । प्रजास्विति
प्र – जासु । एव प्रजातासु । प्रजातासु कुह्वा । प्रजातास्विति
प्र – जातासु । कुह्वा वाचम् । वाचम् दधाति । दधात्येताः ।
एता एव । एव निः । निर् वपेत् । वपेत् पशुकामः ।
पशुकाम श्छन्दा॑ꣳसि । पशुकाम इति पशु – कामः ।
छन्दा॑ꣳसि वै । वै देविकाः । देविका श्छन्दा॑ꣳसि ।
छन्दा॑ꣳसीव । **29 (50/58)**

**T.S.3.4.9.2 - Kramam**

इव खलु । खलु वै । वै पशवः । पशव श्छन्दोभिः । छन्दोभिरेव ।
छन्दोभिरिति छन्दः – भिः । एवास्मै । अस्मै पशून् । पशून् प्र ।
प्र जनयति । जनयति प्रथमम् । प्रथमम् धातारम् । धातारम् करोति ।
करोति प्र । प्रैव । एव तेन । तेन वापयति । वापयत्यनु । अन्वेव ।
एवास्मै । अस्मा अनुमतिः । अनुमतिर् मन्यते ।
अनुमतिरित्यनु – मतिः । मन्यते राते । राते राका । राका प्र ।
प्र सिनीवाली । सिनीवाली जनयति । जनयति पशून् । पशूनेव ।
एव प्रजातान् । प्रजातान् कुह्वा । प्रजातानिति प्र – जातान् ।

कुह्वा प्रति । प्रतिष्ठापयति । स्थापयत्येताः । एता एव । एव निः ।
निर् वपेत् । वपेद् ग्रामकामः । ग्रामकाम श्छन्दाꣳसि ।
ग्रामकाम इति ग्राम – कामः । छन्दाꣳसि वै । वै देविकाः ।
देविका श्छन्दाꣳसि । छन्दाꣳसीव । इव खलु । खलु वै । वै ग्रामः ।
ग्राम श्छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः–भिः । एवास्मै ।
अस्मै ग्रामम् । ग्राममव । **30 (50/55)**

**T.S.3.4.9.3 - Kramam**

अव रुन्धे । रुन्धे मद्ध्यतः । मद्ध्यतो धातारम् । धातारम् करोति ।
करोति मद्ध्यतः । मद्ध्यत एव । एवैनम् । एनम् ग्रामस्य ।
ग्रामस्य दधाति । दधत्येताः । एता एव । एव निः । निर् वपेत् ।
वपेज् ज्योगामयावी । ज्योगामयावी छन्दाꣳसि । ज्योगामयावीति
ज्योक् – आमयावी । छन्दाꣳसि वै । वै देविकाः । देविका
श्छन्दाꣳसि । छन्दाꣳसि खलु । खलु वै । वा एतम् । एतमभि ।
अभि मन्यन्ते । मन्यन्ते यस्य । यस्य ज्योक् । ज्योगामयति ।
आमयति छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः – भिः ।
एवैनम् । एनमगदम् । अगदम् करोति । करोति मद्ध्यतः ।

मद्ध्यतो धातारम् । धातारम् करोति । करोति मद्ध्यतः ।

मद्ध्यतो वै । वा एतस्य । एतस्याक्लृप्तम् । अक्लृप्तम् ँयस्य ।

यस्य ज्योक् । ज्योगामयति । आमयति मद्ध्यतः । मद्ध्यत एव ।

एवास्य । अस्य तेन । तेन कल्पयति । कल्पयत्येताः । एता एव ।

एव निः । निर् वपेत् । **31** (**50/52**)

**T.S.3.4.9.4 - Kramam**

वपेद् यम् । यं ँयज्ञः । यज्ञो न । नोपनमेत् । उपनमेच्छन्दा॑ꣳसि ।

उपनमेदित्युप - नमेत् । छन्दा॑ꣳसि वै । वै देविकाः । देविका

श्छन्दा॑ꣳसि । छन्दा॑ꣳसि खलु । खलु वै । वा एतम् । एतम् न ।

नोप । उप नमन्ति । नमन्ति यम् । यं ँयज्ञः । यज्ञो न । नोपनमति ।

उपनमति प्रथमम् । उपनमतीत्युप - नमति । प्रथमम् धातारम् ।

धातारम् करोति । करोति मुखतः । मुखत एव । एवास्मै । अस्मै

छन्दा॑ꣳसि । छन्दा॑ꣳसि दधाति । दधात्युप । उपैनम् । एनं ँयज्ञः ।

यज्ञो नमति । नमत्येताः । एता एव । एव निः । निर् वपेत् ।

वपेदीजानः । ईजान श्छन्दा॑ꣳसि । छन्दा॑ꣳसि वै । वै देविकाः ।

देविका यातयामानि । यातयामानीव । यातयामानीति यात - यामानि ।

इव खलु । खलु वै । वा एतस्य । एतस्य छन्दाꣳसि ।

छन्दाꣳसि यः । य ईजानः । ईजान उत्तमम् । उत्तमम् धातारम् ।

उत्तममित्युत् – तमम् । धातारम् करोति ।

करोत्युपरिष्टात् । **32** (**50/54**)

**T.S.3.4.9.5 - Kramam**

उपरिष्टादेव । एवास्मै । अस्मै छन्दाꣳसि । छन्दाꣳस्ययातयामानि ।

अयातयामान्यव । अयातयामानीत्ययात – यामानि । अव रुन्धे ।

रुन्ध उप । उपैनम् । एनमुत्तरः । उत्तरो यज्ञः । उत्तर इत्युत् – तरः ।

यज्ञो नमति । नमत्येताः । एता एव । एव निः । निर् वपेत् ।

वपेद् यम् । यम् मेधा । मेधा न । नोपनमेत् । उपनमेच्छन्दाꣳसि ।

उपनमेदित्युप – नमेत् । छन्दाꣳसि वै । वै देविकाः । देविका

३छन्दाꣳसि । छन्दाꣳसि खलु । खलु वै । वा एतम् । एतम् न ।

नोप । उप नमन्ति । नमन्ति यम् । यम् मेधा । मेधा न । नोपनमति ।

उपनमति प्रथमम् । उपनमतीत्युप – नमति । प्रथमम् धातारम् ।

धातारम् करोति । करोति मुखतः । मुखत एव । एवास्मै ।

अस्मै छन्दाꣳसि । छन्दाꣳसि दधाति । दधात्युप । उपैनम् ।
एनम् मेधा । मेधा नमति । नमत्येताः । एता एव । एव निः ।
निर् वपेत् । वपेद् रुक्कामः । **33 (50/54)**

**T.S.3.4.9.6 - Kramam**

रुक्काम श्छन्दाꣳसि । रुक्काम इति रुक् - कामः । छन्दाꣳसि वै ।
वै देविकाः । देविका श्छन्दाꣳसि । छन्दाꣳसीव । इव खलु ।
खलु वै । वै रुक् । रुक् छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति
छन्दः - भिः । एवास्मिन्न् । अस्मिन् रुचम् । रुचम् दधाति ।
दधाति क्षीरे । क्षीरे भवन्ति । भवन्ति रुचम् । रुचमेव । एवास्मिन्न् ।
अस्मिन् दधति । दधति मद्ध्यतः । मद्ध्यतो धातारम् । धातारम्
करोति । करोति मद्ध्यतः । मद्ध्यत एव । एवैनम् । एनꣳ रुचः ।
रुचो दधाति । दधाति गायत्री । गायत्री वै । वा अनुमतिः ।
अनुमतिस्त्रिष्टुक् । अनुमतिरित्यनु - मतिः । त्रिष्टुग् राका ।
राका जगती । जगती सिनीवाली । सिनीवाल्यनुष्टुप् । अनुष्टुप्
कुहूः । अनुष्टुबित्यनु - स्तुप् । कुहूर् धाता । धाता वषट्कारः ।
वषट्कारः पूर्वपक्षः । वषट्कार इति वषट्-कारः । पूर्वपक्षो राका ।

पूर्वपक्ष इति पूर्व – पक्षः । राका ऽपरपक्षः । अपरपक्षः कुहूः ।
अपरपक्ष इत्यपर–पक्षः । कुहूरमावास्या । अमावास्या सिनीवाली ।
अमावास्येत्यमा – वास्या । सिनीवाली पौर्णमासी ।
पौर्णमास्यनुमतिः । पौर्णमासीति पौर्ण–मासी । अनुमति श्चन्द्रमाः ।
अनुमतिरित्यनु – मतिः । चन्द्रमा धाता । धाता ऽष्टौ ।
अष्टौ वसवः । **34** (**50/60**)

**T.S.3.4.9.7 - Kramam**

वसवो ऽष्टाक्षरा । अष्टाक्षरा गायत्री । अष्टाक्षरेत्यष्टा – अक्षरा ।
गायत्र्येकादश । एकादश रुद्राः । रुद्रा एकादशाक्षरा । एकादशाक्षरा त्रिष्टुप् । एकादशाक्षरेत्येकादश – अक्षरा । त्रिष्टुब् द्वादश ।
द्वादशादित्याः । आदित्या द्वादशाक्षरा । द्वादशाक्षरा जगती ।
द्वादशाक्षरेति द्वादश – अक्षरा । जगती प्रजापतिः । प्रजापतिरनुष्टुप् ।
प्रजापतिरिति प्रजा – पतिः । अनुष्टुब् धाता । अनुष्टुबित्यनु–स्तुप् ।
धाता वषट्कारः । वषट्कार एतत् । वषट्कार इति वषट् – कारः ।
एतद् वै । वै देविकाः । देविकाः सर्वाणि । सर्वाणि च ।
च छन्दाꣳसि । छन्दाꣳसि सर्वाः । सर्वाश्च । च देवताः ।

देवता वषट्कारः । वषट्कारस्ताः । वषट्कार इति वषट् – कारः ।
ता यत् । यथ् सह । सह सर्वाः । सर्वा निर्वपेत् । निर्वपेदीश्वराः ।
निर्वपेदिति निः – वपेत् । ईश्वरा एनम् । एनम् प्रदहः । प्रदहो द्वे ।
प्रदह इति प्र – दहः । द्वे प्रथमे । द्वे इति द्वे । प्रथमे निरुप्य ।
प्रथमे इति प्रथमे । निरुप्य धातुः । निरुप्येति निः – उप्य ।
धातु स्तृतीयम् । तृतीयम् निः । निर् वपेत् । वपेत् तथो । तथो एव ।
तथो इति तथो । एवोत्तरे । उत्तरे निः । उत्तरे इत्युत् – तरे ।
निर् वपेत् । वपेत् तथा । तथैनम् । एनम् न । न प्र ।
प्र दहन्ति ( ) । दहन्त्यथो । अथो यस्मै । अथो इत्यथो ।
यस्मै कामाय । कामाय निरुप्यन्ते । निरुप्यन्ते तम् । निरुप्यन्त इति
निः – उप्यन्ते । तमेव । एवाभिः । आभिरुप । उपाप्नोति ।
आप्नोतीत्याप्नोति ॥ **35** (**59/75**)

*(पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसि – ग्रामं – कल्पयत्येता एव नि – रुत्तमन्धातारं करोति – मेधा नमत्येता एव निर्वपे – दृष्टौ – दहन्ति – नव च) (A9)*

**T.S.3.4.10.1 - Kramam**

वास्तोष्पते । पते प्रति । प्रति जानीहि । जानीह्यस्मान् । अस्मान्थ्
स्वावेशः । स्वावेशो अनमीवः । स्वावेश इति सु – आवेशः ।
अनमीवो भव । भवा नः । न इति नः ॥ यत् त्वा । त्वेमहे ।
ईमहे प्रति । प्रति तत् । तन् नः । नो जुषस्व । जुषस्व शम् ।
शम् नः । न एधि । एधि द्विपदे । द्विपदे शम् । द्विपद इति
द्वि–पदे । शम् चतुष्पदे । चतुष्पद इति चतुः – पदे ॥ वास्तोष्पते ।
पते शग्मया । शग्मया सꣳसदा । सꣳसदा ते । सꣳसदेति
सम् – सदा । ते सक्षीमहि । सक्षीमहि रण्वया । रण्वया गातुमत्या ।
गातुमत्येति गातु – मत्या ॥ आवः क्षेमे । क्षेम उत । उत योगे ।
योगे वरम् । वरम् नः । नो यूयम् । यूयम् पात । पात स्वस्तिभिः ।
स्वस्तिभिः सदा । स्वस्तिभिरिति स्वस्ति – भिः । सदा नः ।
न इति नः ॥ यथ् सायम्प्रातः । सायम्प्रातरग्निहोत्रम् ।
सायम्प्रातरिति सायम् – प्रातः । अग्निहोत्रम् जुहोति ।
अग्निहोत्रमित्यग्नि–होत्रम् । जुहोत्याहुतीष्टकाः । आहुतीष्टका एव ।

आहुतीष्टका इत्याहुति – इष्टकाः । एव ताः । ता उप । उप धत्ते ।
धत्ते यजमानः । **36** (**50/57**)

**T.S.3.4.10.2 - Kramam**

यजमानो ऽहोरात्राणि । अहोरात्राणि वै । अहोरात्राणीत्यहः–रात्राणि ।
वा एतस्य । एतस्येष्टकाः । इष्टका यः । य आहिताग्निः ।
आहिताग्निर् यत् । आहिताग्निरित्याहित–अग्निः । यथ् सायम्प्रातः ।
सायम्प्रातर् जुहोति । सायम्प्रातरिति सायं – प्रातः ।
जुहोत्यहोरात्राणि । अहोरात्राण्येव । अहोरात्राणीत्यहः – रात्राणि ।
एवाप्त्वा । आप्त्वेष्टकाः । इष्टकाः कृत्वा । कृत्वोप । उप धत्ते ।
धत्ते दश । दश समानत्र । समानत्र जुहोति । जुहोति दशाक्षरा ।
दशाक्षरा विराट् । दशाक्षरेति दश – अक्षरा । विराड् विराजम् ।
विराडिति वि – राट् । विराजमेव । विराजमिति वि – राजम् ।
एवाप्त्वा । आप्त्वेष्टकाम् । इष्टकाम् कृत्वा । कृत्वोप । उप धत्ते ।
धत्ते ऽथो । अथो विराजि । अथो इत्यथो । विराज्येव । विराजीति
वि – राजि । एव यज्ञम् । यज्ञमाप्नोति । आप्नोति चित्यश्चित्यः ।
चित्यश्चित्यो ऽस्य । चित्यश्चित्य इति चित्यः – चित्यः ।

अस्य भवति । भवति तस्मात् । तस्माद् यत्र । यत्र दश ।

दशोषित्वा । उषित्वा प्रयाति । प्रयाति तत् । प्रयातीति प्र – याति ।

तद् यज्ञवास्तु । यज्ञवास्त्ववास्तु । यज्ञवास्त्विति यज्ञ – वास्तु ।

अवास्त्वेव । एव तत् । तद् यत् । यत् ततः । ततो ऽर्वाचीनम् ।

अर्वाचीनꣳ रुद्रः । **37 (50/62)**

**T.S.3.4.10.3 - Kramam**

रुद्रः खलु । खलु वै । वै वास्तोष्पतिः । वास्तोष्पतिर् यत् ।

वास्तोष्पतिरिति वास्तोः–पतिः । यदहुत्वा । अहुत्वा वास्तोष्पतीयम् ।

वास्तोष्पतीयम् प्रयायात् । वास्तोष्पतीयमिति वास्तोः – पतीयम् ।

प्रयायाद् रुद्रः । प्रयायादिति प्र–यायात् । रुद्र एनम् । एनम् भूत्वा ।

भूत्वा ऽग्निः । अग्निरनूत्थाय । अनूत्थाय हन्यात् ।

अनूत्थायेत्यनु – उत्थाय । हन्याद् वास्तोष्पतीयम् । वास्तोष्पतीयम्

जुहोति । वास्तोष्पतीयमिति वास्तोः–पतीयम् । जुहोति भागधेयेन ।

भागधेयेनैव । भागधेयेनेति भाग–धेयेन । एवैनम् । एनꣳ शमयति ।

शमयति न । नार्तिम् । आर्तिमा । आर्च्छति । ऋच्छति यजमानः ।

यजमानो यत् । यद् युक्ते । युक्ते जुहुयात् । जुहुयाद् यथा ।

यथा प्रयाते । प्रयाते वास्तौ । प्रयात इति प्र-याते । वास्तावाहुतिम् ।

आहुतिम् जुहोति । आहुतिमित्या - हुतिम् । जुहोति तादृक् ।

तादृगेव । एव तत् । तद् यत् । यदयुक्ते । अयुक्ते जुहुयात् ।

जुहुयाद् यथा । यथा क्षेमे । क्षेम आहुतिम् । आहुतिम् जुहोति ।

आहुतिमित्या - हुतिम् । जुहोति तादृक् । तादृगेव । एव तत् ।

तदहुतम् । अहुतमस्य । अस्य वास्तोष्पतीयम् ।

वास्तोष्पतीयꣳ स्यात् । वास्तोष्पतीयमिति वास्तोः - पतीयम् ।

स्याद् दक्षिणः । **38** (**50/60**)

**T.S.3.4.10.4 - Kramam**

दक्षिणो युक्तः । युक्तो भवति । भवति सव्यः । सव्यो ऽयुक्तः ।

अयुक्तो ऽथ । अथ वास्तोष्पतीयम् । वास्तोष्पतीयम् जुहोति ।

वास्तोष्पतीयमिति वास्तोः - पतीयम् । जुहोत्युभयम् । उभयमेव ।

एवाकः । अकरपरिवर्गम् । अपरिवर्गमेव ।

अपरिवर्गमित्यपरि - वर्गम् । एवैनम् । एनꣳ शमयति । शमयति

यत् । यदेकया । एकया जुहुयात् । जुहुयाद् दर्विहोमम् । दर्विहोमम्

कुर्यात् । दर्विहोममिति दर्वि - होमम् । कुर्यात् पुरोनुवाक्याम् ।

पुरोनुवाक्यामनूच्य । पुरोनुवाक्यामिति पुरः – अनुवाक्याम् ।
अनूच्य याज्यया । अनुच्येत्यनु – उच्य । याज्यया जुहोति । जुहोति
सदेवत्वाय । सदेवत्वाय यत् । सदेवत्वायेति सदेव–त्वाय । यद्धुते ।
हुत आदद्ध्यात् । आदद्ध्याद् रुद्रम् । आदद्ध्यादित्या – दद्ध्यात् ।
रुद्रम् गृहान् । गृहानन्वारोहयेत् । अन्वारोहयेद् यत् ।
अन्वारोहयेदित्यनु – आरोहयेत् । यदवक्षाणानि ।
अवक्षाणान्यसम्प्रक्षाप्य । अवक्षाणानीत्यव – क्षाणानि । असम्प्रक्षाप्य
प्रयायात् । असम्प्रक्षाप्येत्यसम् – प्रक्षाप्य । प्रयायाद् यथा ।
प्रयायादिति प्र – यायात् । यथा यज्ञवेशसम् । यज्ञवेशसं ँवा ।
यज्ञवेशसमिति यज्ञ – वेशसम् । वा ऽऽदहनम् । आदहनं ँवा ।
आदहनमित्या – दहनम् । वा तादृक् । तादृगेव । एव तत् । तदयम् ।
अयम् ते । ते योनिः । योनिर्. ऋत्वियः । ऋत्विय इति । इत्यरण्योः ।
अरण्योः समारोहयति ( ) । समारोहयत्येषः ।
समारोहयतीति सम् – आरोहयति । **39** (**50/64**)

**T.S.3.4.10.5 - Kramam**

एष वै । वा अग्नेः । अग्नेर् योनिः । योनिः स्वे । स्व एव ।

एवैनम् । एनं ँयोनौ । योनौ समारोहयति । समारोहयत्यथो ।

समारोहयतीति सम् - आरोहयति । अथो खलु । अथो इत्यथो ।

खल्वाहुः । आहुर् यत् । यदरण्योः । अरण्योः समारूढः । समारूढो

नश्येत् । समारूढ इति सम् - आरूढः । नश्येदुत् । उदस्य ।

अस्याग्निः । अग्निः सीदेत् । सीदेत् पुनराधेयः । पुनराधेयः स्यात् ।

पुनराधेय इति पुनः - आधेयः । स्यादिति । इति या । या ते ।

ते अग्ने । अग्ने यज्ञिया । यज्ञिया तनूः । तनूस्तया । तया । एहि ।

इह्या । आ रोह । रोहेति । इत्यात्मन्न् । आत्मन्थ् समारोहयते ।

समारोहयते यजमानः । समारोहयत इति सम् - आरोहयते ।

यजमानो वै । वा अग्नेः । अग्नेर् योनिः । योनिः स्वायाम् ।

स्वायामेव । एवैनम् । एनं ँयोन्याम् । योन्या~ं समारोहयते ।

समारोहयत इति सम् - आरोहयते ॥ **40** (**45/50**)

*(धत्ते - ऽर्वाचीन~ं - स्याथ् - समारोहयति - पञ्चचत्वारि~ंशच्च) (A10)*

**T.S.3.4.11.1 - Kramam**

त्वमग्ने । अग्ने बृहत् । बृहद् वयः । वयो दधासि । दधासि देव ।
देव दाशुषे । दाशुष इति दाशुषे ॥ कविर् गृहपतिः ।
गृहपतिर् युवा । गृहपतिरिति गृह – पतिः । युवेति युवा ॥
हव्यवाडग्निः । हव्यवाडिति हव्य – वाट् । अग्निरजरः ।
अजरः पिता । पिता नः । नो विभुः । विभुर् विभावा ।
विभुरिति वि – भुः । विभावा सुदृशीकः । विभावेति वि – भावा ।
सुदृशीको अस्मे । सुदृशीक इति सु – दृशीकः । अस्मे इत्यस्मे ॥
सुगार्.हपत्याः सम् । सुगार्.हपत्या इति सु – गार्हपत्याः ।
समिषः । इषो दिदीहि । दिदीह्यस्मद्रियक् । अस्मद्रियख् सम् ।
अस्मद्रियगित्यस्म – द्रियक् । सम् मिमीहि । मिमीहि श्रवाꣳसि ।
श्रवाꣳसीति श्रवाꣳसि ॥ त्वम् च । च सोम । सोम नः ।
नो वशः । वशो जीवातुम् । जीवातुम् न । न मरामहे । मरामह
इति मरामहे ॥ प्रियस्तोत्रो वनस्पतिः । प्रियस्तोत्र इति प्रिय–स्तोत्रः ।
वनस्पतिरिति वनस्पतिः ॥ ब्रह्मा देवानाम् । देवानाम् पदवीः । पदवीः
कवीनाम् । पदवीरिति पद – वीः । कवीनामृषिः । ऋषिर् विप्राणाम् ।

विप्राणाम् महिषः । महिषो मृगाणाम् । मृगाणामिति मृगाणाम् ॥
श्येनो गृद्ध्राणाम् । गृद्ध्राणा७ स्वधितिः । स्वधितिर् वनानाम् ।
स्वधितिरिति स्व – धितिः । वनाना७ सोमः ।
सोमः पवित्रम् । 41 (50/60)

**T.S.3.4.11.2 - Kramam**

पवित्रमति । अत्येति । एति रेभन्न् । रेभन्निति रेभन्न् ॥ आ विश्वदेवम् ।
विश्वदेव७ सत्पतिम् । विश्वदेवमिति विश्व–देवम् । सत्पति७ सूक्तैः ।
सत्पतिमिति सत् – पतिम् । सूक्तैरद्य । सूक्तैरिति सु – उक्तैः ।
अद्या वृणीमहे । वृणीमह इति वृणीमहे ॥ सत्यसव७ सवितारम् ।
सत्यसवमिति सत्य–सवम् । सवितारमिति सवितारम् ॥ आ सत्येन ।
सत्येन रजसा । रजसा वर्तमानः । वर्तमानो निवेशयन्न् ।
निवेशयन्नमृतम् । निवेशयन्निति नि – वेशयन्न् । अमृतम् मर्त्यम् ।
मर्त्यम् च । चेति च ॥ हिरण्ययेन सविता । सविता रथेन । रथेना ।
आ देवः । देवो याति । याति भुवना । भुवना विपश्यन्न् ।
विपश्यन्निति वि–पश्यन्न् ॥ यथा नः । नो अदितिः । अदितिः करत् ।
करत् पश्वे । पश्वे नृभ्यः । नृभ्यो यथा । नृभ्य इति नृ – भ्यः ।

यथा गवे । गव इति गवे ॥ यथा तोकाय । तोकाय रुद्रियम् । रुद्रियमिति रुद्रियम् ॥ मा नः । न स्तोके । तोके तनये । तनये मा । मा नः । न आयुषि । आयुषि मा । मा नः । नो गोषु । गोषु मा । मा नः । **42** (**50/56**)

**T.S.3.4.11.3 - Kramam**

नो अश्वेषु । अश्वेषु रीरिषः । रीरिष इति रीरिषः ॥ वीरान् मा । मा नः । नो रुद्र । रुद्र भामितः । भामितो वधीः । वधीर्. हविष्मन्तः । हविष्मन्तो नमसा । नमसा विधेम । विधेम ते । त इति ते ॥ उदप्रुतो न । उदप्रुत इत्युद – प्रुतः । न वयः । वयो रक्षमाणाः । रक्षमाणा वावदतः । वावदतो अभ्रियस्य । अभ्रियस्येव । इव घोषाः । घोषा इति घोषाः ॥ गिरिभ्रजो न । गिरिभ्रज इति गिरि – भ्रजः । नोर्मयः । ऊर्मयो मदन्तः । मदन्तो बृहस्पतिम् । बृहस्पतिमभि । अभ्यर्काः । अर्का अनावन्न् । अनावन्नित्यनावन्न् ॥ ह॒ꣳसैरिव । इव सखिभिः । सखिभिर् वावदद्भिः । सखिभिरिति सखि – भिः । वावदद्भिरश्मन्मयानि । वावदद्भिरिति वावदत् – भिः । अश्मन्मयानि नहना ।

अश्मन्मयानीत्यश्मन्न् – मयानि । नहना व्यस्यन्न् ।
व्यस्यन्निति वि – अस्यन्न् ॥ बृहस्पतिरभिकनिक्रदत् ।
अभिकनिक्रदद् गाः । अभिकनिक्रददित्यभि – कनिक्रदत् । गा उत ।
उत प्र । प्रास्तौत् । अस्तौदुत् । उच् च । च विद्वान् ।
विद्वाॅ अगायत् । अगायदित्यगायत् ॥ एन्द्र । इन्द्र सानसिम् ।
सानसिॅ रयिम् । रयिॅ सजित्वानम् । **43 (50/56)**

**T.S.3.4.11.4 - Kramam**

सजित्वानॅ सदासहम् । सजित्वानमिति स – जित्वानम् ।
सदासहमिति सदा – सहम् ॥ वर्.षिष्ठमूतये । ऊतये भर । भरेति
भर ॥ प्र ससाहिषे । ससाहिषे पुरुहूत । पुरुहूत शत्रून् । पुरुहूतेति
पुरु – हूत । शत्रून् ज्येष्ठः । ज्येष्ठस्ते । ते शुष्मः । शुष्म इह ।
इह रातिः । रातिरस्तु । अस्त्वित्यस्तु ॥ इन्द्रा । आ भर ।
भर दक्षिणेन । दक्षिणेना वसूनि । वसूनि पतिः । पतिः सिन्धूनाम् ।
सिन्धूनामसि । असि रेवतीनाम् । रेवतीनामिति रेवतीनाम् ॥
त्वॅ सुतस्य । सुतस्य पीतये । पीतये सद्यः । सद्यो वृद्धः ।
वृद्धो अजायथाः । अजायथा इत्यजायथाः ॥ इन्द्र ज्यैष्ठ्याय ।

ज्यैष्ठ्याय सुक्रतो । सुक्रतो इति सु – क्रतो ॥ भुवस्त्वम् ।
त्वमिन्द्र । इन्द्र ब्रह्मणा । ब्रह्मणा महान् । महान् भुवः ।
भुवो विश्वेषु । विश्वेषु सवनेषु । सवनेषु यज्ञियः । यज्ञिय इति
यज्ञियः ॥ भुवो नॄन् । नॄ७श्च्यौत्नः । च्यौत्नो विश्वस्मिन्न् ।
विश्वस्मिन् भरे । भरे ज्येष्ठः । ज्येष्ठश्च । च मन्त्रः ।
मन्त्रो विश्वचर्.षणे । **44** (**50/52**)

**T.S.3.4.11.5 - Kramam**

विश्वचर्.षण इति विश्व – चर्.षणे ॥ मित्रस्य चर्.षणीधृतः ।
चर्.षणीधृतः श्रवः । चर्.षणीधृत इति चर्.षणि – धृतः ।
श्रवो देवस्य । देवस्य सानसिम् । सानसिमिति सानसिम् ॥
सत्यम् चित्रश्रवस्तमम् । चित्रश्रवस्तममिति चित्रश्रवः – तमम् ।
मित्रो जनान् । जनान्. यातयति । यातयति प्रजानन्न् । प्रजानन् मित्रः ।
प्रजानन्निति प्र – जानन्न् । मित्रो दाधार । दाधार पृथिवीम् ।
पृथिवीमुत । उत द्याम् । द्यामिति द्याम् ॥ मित्रः कृष्टीः ।
कृष्टीरनिमिषा । अनिमिषाऽभि । अनिमिषेत्यनि – मिषा । अभि चष्टे ।
चष्टे सत्याय । सत्याय हव्यम् । हव्यम् घृतवत् । घृतवद् विधेम ।

घृतवदिति घृत - वत् । विधेमेति विधेम ॥ प्र सः । स मित्र ।
मित्र मर्तः । मर्तो अस्तु । अस्तु प्रयस्वान् । प्रयस्वान्. यः । यस्ते ।
त आदित्य । आदित्य शिक्षति । शिक्षति व्रतेन । व्रतेनेति व्रतेन ॥
न हन्यते । हन्यते न । न जीयते । जीयते त्वोतः । त्वोतो न । नैनम् ।
एनमꣳहः । अꣳहो अश्ञोति । अश्ञोत्यन्तितः । अन्तितो न ।
न दूरात् । दूरादिति दूरात् ॥ यच्चित् । **45** (**50/54**)

**T.S.3.4.11.6 - Kramam**

चिद्धि । हि ते । ते विशः । विशो यथा । यथा प्र । प्र देव ।
देव वरुण । वरुण व्रतम् । व्रतमिति व्रतम् ॥ मीनीमसि द्यविद्यवि ।
द्यविद्यवीति द्यवि - द्यवि ॥ यत् किम् । किम् च । चेदम् ।
इदं वरुण । वरुण दैव्ये । दैव्ये जने । जने ऽभिद्रोहम् । अभिद्रोहम्
मनुष्याः । अभिद्रोहमित्यभि - द्रोहम् । मनुष्याश्चरामसि ।
चरामसीति चरामसि ॥ अचित्ती यत् । यत् तव । तव धर्मा ।
धर्मा युयोपिम । युयोपिम मा । मा नः । न स्तस्मात् । तस्मादेनसः ।
एनसो देव । देव रीरिषः । रीरिष इति रीरिषः ॥ कितवासो यत् ।
यद् रिरिपुः । रिरिपुर् न । न दीवि । दीवि यत् । यद् वा । वा घ ।

घा सत्यम् । सत्यमुत । उत यत् । यन् न । न विद्म । विद्मेति विद्म ॥ सर्वा ता । ता वि । वि ष्य । स्य शिथिरा ( ) । शिथिरेव । इव देव । देवाथ । अथा ते । ते स्याम । स्याम वरुण । वरुण प्रियासः । प्रियास इति प्रियासः ॥ 46 (57/58)

*(सोमो–गोषु मा–रयिं–मन्त्रो–य–च्छिथिरा–सप्त च) (A11)*

====================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(वि वा एतस्या – ऽऽवायो – इमे वै – चित्तञ्चा – ऽग्निर्भूतानां – देवा वा अभ्याताना – नृताषाड् – राष्ट्रकामाय – देविका – वास्तोष्पते – त्वमग्ने बृह – देकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(वि वा एतस्ये – त्याह – मृत्युर्गन्धर्वो – ऽव रुन्धे मद्ध्यत – स्त्वमग्ने बृहथ् – षट्चत्वारि॒ꣳशत्)

**First and Last Padam of Fourth Prasnam of Kadaam 3 :-**

(वि वा एतस्य – प्रियासः)

॥ हरिः ओं ॥

॥ इति तृतीय काण्डे चतुर्थ प्रश्नः – क्रम पाठः समाप्तः ॥

==================

## Details of Panchati , Padam and Krama Vaakyam for Kandam 3 ,Prasanam 1 (TS 3.4)

| | Panchati | Padams | Krama Vaakyam |
|---|---|---|---|
| Anuvakam 1 | 4 | 221 | 258 |
| Anuvakam 2 | 2 | 113 | 125 |
| Anuvakam 3 | 8 | 392 | 455 |
| Anuvakam 4 | 1 | 75 | 86 |
| Anuvakam 5 | 1 | 67 | 74 |
| Anuvakam 6 | 2 | 118 | 143 |
| Anuvakam 7 | 3 | 146 | 169 |
| Anuvakam 8 | 7 | 349 | 413 |
| Anuvakam 9 | 7 | 359 | 408 |
| Anuvakam 10 | 5 | 245 | 293 |
| Anuvakam 11 | 6 | 307 | 336 |
| Total → | 46 | 2392 | 2760 |